श्रीसीतारामाभ्यां नमः ।

श्रीरामतत्त्वभास्करे उत्तरार्द्धं

प्रारम्भम् ।

सज्जनचातकसुखदं सीता सौदामिनीसमायुक्तम् ।
रामं श्यामलमेघं वन्दे करुणाम्बुभिः पूर्णम् ॥ १ ॥
रघुवंशाब्धिसंभूतं करुणांशुभिरावृतम् । जानकीचंद्रिकायुक्तं रामचन्द्रं नमाम्यहम् ॥ २ ॥ पौरुषेचाप्रतिद्वन्द्वं महापुरुषसंज्ञकम् । क्लेशादिवर्जितं नित्यं वन्दे रामं जगद्गुरुम् ॥ ३ ॥ पौरुषे चाप्रतिद्वन्द्वमिति। पौरुषे अप्रतिद्वन्द्वं समाधिकरहितम् । तथाच श्रीमद्रामायणे—श्रीमल्लक्ष्मणवाक्यम्।धर्म्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि । पौरुषे चाप्रतिद्वन्द्वश्शरैनं जहि रावणिम् ॥ अतएव महापुरुषसंज्ञकम्। अत्र श्रीमच्छङ्कराचार्य्योदाहृतविष्णुसहस्रनामभाष्यस्थ पुरुषशब्दनिरुक्तिश्रुतिस्मृतयः।पुरं शरीरं तस्मिन् शेते इति पुरुषः ॥ नवद्वारं पुरं पुण्यमेतैर्भावैः समन्वितम् ॥ व्याप्य शेते महात्मा यस्तस्मात्पुरुष उच्यते, इति महाभारते ॥ यद्वा अस्तेर्व्यत्यस्ताक्षरयोगिनः । आसीत्पुरा पूर्वमेवेति विग्रहं कृत्वा व्यु-

स्पादितः पुरुषः । पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वमितिश्रुतेः ॥ अथवा पूर्षु पुरीषूत्कर्षशालिषु सत्वेषु सीदतीति वा, पुरूणि बहूनि फलानि मनोऽभि-लषितानि सनोति ददाति वा, पुरूणि भुवनानि सं-हारसमयेस्यति अन्तंकरोतीति वा पूर्णत्वात्पूरणात्स-दनाद्वापुरुषः ॥ पूरणात्सदनाच्चैव ततोऽसौ पुरुषोमत इति पंचमवेदे ॥ सर्वस्मात्पुराऽस्थितत्वात्सर्वपापस्य सादनाद्वा पुरुषः स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान् पाप्मन औषत्तस्मात्पुरुष इति श्रुतेः । पुरि शयनाद्वा पुरुषःस वा अयं पुरुषः। सर्वासु पूर्षुपुरीशय इति श्रुतेः। महांश्चासौ पुरुषश्च महापुरुषः महापुरुषइति संज्ञा यस्य स महापुरुषसंज्ञकस्तम् ॥ तथाच भागवते—ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिंचिनुतं शरण्यम् ॥ भृत्यार्तिहं प्रणतपालभवाब्धिपोतं वन्दे महापुरुष ते चरणारविन्दम् ॥ त्यक्त्वासुदुस्त्यज-सुरेप्सितराज्यलक्ष्मीं धर्मिष्ठआर्यवचसा यदगादर-ण्यम् ॥ मायामृगं दयितयेप्सितमन्वधावद्वन्दे महा-पुरुष ते चरणारविन्दम् ॥ तथा च पाद्मोत्तरखण्डे रामाष्टोत्तरशतनामसु—आदिपुरुषो महापुरुषः परमः पुरुषस्तथा । पुण्योदयोदयासारः पुराणःपुरुषोत्तमः॥ क्लेशादिवर्जितमिति ॥ तथाच योगसूत्रम् ॥

क्लेशकर्म विपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरो नित्यमिति । नियमेन भवं नित्यं ध्यपने-ध्रुवम् ॥ तथा च श्रुतिः—नित्यो नित्यानां चेतन-श्चेतनानामेको बहूनां यो विदधाति कामान्॥ अस्या अर्थः । य एको नित्यश्चेतनः स बहूनां नित्यानां चेतनानां कामान् विदधाति जगद्गुरुरिति॥ तथा च पाद्मोत्तरखंडे—जितेन्द्रियो जितक्रोधो जितामित्रो जगद्गुरुः । ऋक्षवानरसंघाती चित्रकूटसमाश्रितः ॥ सनत्कुमारसंहितायाञ्च-राजराजं रघुवरं कौशल्यानन्द-वर्द्धनम् । भर्गं वरेण्यं विश्वेशं रघुनाथं जगद्गुरुम् ॥ तथाच योगसूत्रम्—स एष पूर्वेषामपि गुरुः काले-नानवच्छेदात् । तद्भाष्यम्—पूर्वे हि गुरवः कालेनावच्छे-द्यन्ते यत्रावच्छेदार्थे न कालो नोपावर्त्तते स एष पूर्वेषामपि गुरुः यथास्य सर्गस्यादौ प्रकर्षगत्यासिद्धः तथातिक्रान्तसर्गादिष्वपि प्रत्येतव्यः। एतेन सदेवसो-म्येदमग्र आसीदिति श्रुतिरपि व्याख्याता । अस्य सूत्रभाष्यस्यायं भावः ॥ ब्रह्मादिकीटपर्यन्तानां शरीरं कालावच्छेद्यं प्राकृतत्वात् । महापुरुषस्य श्रीरामचन्द्रस्य तु विग्रहं कालेनानवच्छेद्यं सच्चि-दानन्दमयत्वेनाप्राकृतत्वात् ॥ तथाच पाद्मोत्तरखंडे, श्रीरामाष्टोत्तरशतनामसु परमात्मा परब्रह्म सच्चिदान-

न्दविग्रहः । परं ज्योतिः परंधाम पराकाशः परात्परः ॥ अत्र सच्चिदानन्दविग्रहत्वं स्पष्टम् । सनत्कुमारसंहितायामपि—श्रीशार्ङ्गधारिणं रामं सच्चिदानन्दविग्रहमिति ॥ ३ ॥ वशीप्रभुश्च सर्वस्य महोत्कर्षो महाबलः । नरःसादृश्यरहितस्तं रामं प्रणमाम्यहम् ॥ ४ ॥ वशी प्रभुश्च सर्वस्येति वशनं वशः (वशिरण्योरुपसंख्यानमिति वार्त्तिकेन भावेऽप् ।) वशोऽस्यास्तीति वशावशकर्त्तेत्यर्थः। तथा च श्रीमद्रामायणे-इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः । नियतात्मा महावीर्यो द्युतिमान धृतिमान् वशीति ॥ प्रभवतीति प्रभुः स्वामी (विप्रसंभ्योड्वसंज्ञायामिति डुप्रत्ययः) तथा च श्रीमद्रामायणे—प्रोद्यमाने जगन्नाथं सर्वलोकनमस्कृतम् । कौशल्याजनयद्रामं ॥ दिव्यलक्षणसंयुतम्ः नचेयं ममकाकुत्स्थ व्रीडा भवितुमर्हति । त्वया त्रैलोक्यनाथेन यदहं विमुखीकृत ॥ इति च श्रीरामं प्रति परशुरामवाक्यम् ॥ तथा च श्रुतिः—सर्वस्य वशी सर्वस्येशानः॥ महोत्कर्ष इति—महान् समाधिकरहित उत्कर्षो यस्य स अतएव महाबलो महत् सर्वोत्कृष्टं बलं यस्य सः ॥ तथा च श्रीमद्रामायणे ब्रह्मा स्वयम्भूश्चतुराननो वा रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वा । इन्द्रो महेन्द्रस्सुरनायको वा त्रातुं न

शक्ता युधि रामबधयम् ॥ नर इति नरतिसर्वान् स्ववशे प्रापयति गुणद्वारेति नरः ॥ तथा च महाभारते—नरतीति नरःप्रोक्तः परमात्मा सनातन इति। अतएव श्रीमद्रामायणे-श्रीरामस्य नर इति विशेषणम्॥ तथा हि बहवो दुर्लभाश्चैव ये त्वया कीर्त्तिता गुणाः॥ मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नर इति ॥ सादृश्यरहित इति ॥ तथा च श्रुतिः—न तत्सम-श्चाभ्यधिकश्च दृश्यते । स्मृतिश्च—समो न विद्यत यस्य विशिष्टः कुत एव हि ॥ अन्यापि श्रुतिः—एकमेवा द्वितीयं अस्यार्थः। एकं प्रधानमाद्वितीयं स्व-सदृशाद्वितीयरहितम् ॥ ४ ॥ य ईश ईश्वराणन्तु शिवोपास्यः परात्परः ॥ जगज्जन्मादिहेतुश्च तं रामं प्रणमाम्यहम् ॥ ५ ॥ य ईश ईश्वराणामिति । तथा च श्रीमद्रामायणे—सूर्यस्यापि भवेत्सूर्यो ह्यग्नेरग्निः प्रभोः प्रभुः ॥ श्रुतिश्च—तमीश्वराणां परमं महे-श्वरं शिवोपास्य इति ॥ तथा च पाद्मोत्तरखंडे, रामाष्टोत्तरशतनामसु—मायामानुषचारित्रो महा-देवाधिपूजितः । सेतुकृज्जितवाराशिः सर्वतीर्थमयो हरिः ॥ तथा च तापिनीये श्रुतिः—श्रीरामचन्द्रस्य मनुं जजाप वृषभध्वजः। मन्वन्तरसहस्रैस्तु जपहोमा-र्चनादिभिः । ततः प्रसन्नो भगवान श्रीरामः प्राह

शंकरम् ॥ वृणीष्व यदभीष्टं तद्दास्यामि परमेश्वर इति । सहोवाच मणिकर्णिकयां ममक्षेत्रे गंगायां वा तटे पुनः । म्रियते देहितज्जन्तोर्मुक्तिं नातोवरान्तरमिति ॥ अथ सहोवाच ॥ श्रीरामः क्षेत्रेऽत्र तव देवेश यत्र कुत्रापि वा मृताः । कृमिकीटादयोऽप्याशु मुक्ताः सन्तु नचान्यथा ॥ अविमुक्ते तवक्षेत्रे सर्वेषां मुक्तिसिद्धये । अहं सन्निहितस्तत्र पाषाणप्रतिमादिषु ॥ क्षेत्रेऽस्मिन् योऽर्चयेद्भक्त्या मंत्रेणानेन मां शिव । ब्रह्महत्यादिपापेभ्यो मोक्षयिष्यामि माशुचः ॥ त्वत्तो वा ब्रह्मणा वापि ये लभन्ते षडक्षरम् । जीवन्तो मंत्रसिद्धाः स्युर्मुक्ता मां प्राप्नुवन्ति ते ॥ मुमूर्षोर्दक्षिणे कर्णे यस्य कस्यापि वा स्वयम् । उपदेक्ष्यसि मन्मन्त्रं स मुक्तो भविता शिवेति ॥ काशीखण्डे—पेयं पेयं श्रवणपुटके रामनामाभिरामम् । ध्येयं ध्येयं मनसि सततं तारकं ब्रह्मरूपम् ॥ जल्पं जल्पं प्रकृतिविकृतौ प्राणिनां कर्णमूले । वीथ्यां वीथ्यामटति जटिलः कोपि काशीनिवासीति ॥ पुनश्च तत्रैव—मुमूर्षोर्मणिकर्णिकयामर्द्धोदकनिवासिनः । ब्रह्मत्वं जानकीनाथ दिशामि तवतारकम् ॥ तथा च हारीतस्मृतौ—इदमेव जपन्मंत्रं रुद्रास्त्रिपुरहारकः । ब्रह्महत्याविनिर्मुक्तः पूज्यमानोऽभवत्सुरैः । अद्यापि रुद्रःकाश्या-

न्तु सर्वेषां त्यक्तजीविनाम् । दिशत्वेनं महामंत्रं तारकं ब्रह्मनामकम् ॥ पाद्मे-आवां रामजगत्पूज्यौ मम पूज्यौ सदा युवाम् । त्वन्नामजापिनी देवी त्वन्मंत्रजपवानहम् ॥ मुमूर्षोर्मणिकर्णिक्यामर्द्धोदकनिवासिनः । अहं दिशामि ते मन्त्रं तारकं ब्रह्मदायकम् ॥ श्रीरामरामरामेति एतत्तारकमुच्यते ॥ तथा च ब्रह्माण्डे-अहं भवन्नाम गृणन्कृतार्थो वसामि काश्यामनिशं भवान्याः । मुमूर्षुमाणस्य विमुक्तयेऽहं दिशामि मन्त्रं तव रामनाम ॥ ननु पुराणादिषु रामेश्वरादिलिंगस्थापनादेः श्रवणाद्रामोऽपि शिवोपासक इति चेन्न । अवतारधारणकाले स्वस्वरूपगोपनपूर्वकनरवद्व्यवहारस्वीकारात् । तद्भिन्नकाले शिवपूजादेरश्रवणाच्च । ननु यश्च ब्रह्मा च विष्णुश्च त्वं चापि सह दैवतैः । अर्चयध्वं सदा लिंगं तस्माच्छ्रेष्ठतमो हि स इति महाभारतीयवचनेन परस्यापि शिवोपास्य इति, चेन्न । अत्र विष्णुशब्दोऽवतारपरः ब्रह्मसाहचर्यात् । ननु-परमशिवावतारो ब्रह्मपुत्रो यो रुद्रः स एव रामोपासको न परमशिवः परत्वात् ॥ परत्वे प्रमाणं कैवल्योपनिषद् । उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् । ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥ स ब्रह्मा स शिवः

स हरिः सेन्द्रः सोऽक्षर इत्यादि चेन्न । पुराणादिषु काशीश्वरस्य परमशिवत्वेन स्वीकारात् । स एव रामपूजको मन्वन्तरसहस्राणीत्यादिश्रुतिषु स्पष्टम् परात्पर इति । तथा च रामतापिन्याम् । रमन्ते योगिनो यस्मिन्सत्यानन्दे चिदात्मनि । इति राम-पदेनासौ परंब्रह्माभिधीयते ॥ स्मृतिश्च—राम एव परंब्रह्म राम एव परन्तपः । राम एव परं तत्त्वं श्रीरामो ब्रह्मतारकमिति । जगज्जन्मादिहेतुरिति । तथा च व्याससूत्रम् । जन्माद्यस्य यतः, रामतापिन्यां श्रुतिश्च—सीतारामौ तन्मयावत्र पूज्यौ जाता-न्याभ्यां भुवनानि द्विसप्त । स्थितानि च प्रहृतान्येव तेषु ततो रामो मानवो मायया‍ऽधात् । अस्यार्थः— अत्राऽस्मिन षडक्षरमंत्रे सीतारामौ तन्मयौ बीजा-त्मकौ पूज्यौ ज्ञातव्यौ पूजेरत्र ज्ञानार्थत्वन्तु धातू-नामनेकार्थत्वात् । आभ्यां सीतारामाभ्यां द्विसप्त चतुर्दशभुवनानि जातानि ततोऽनन्तरं तेषु भुवनेषु मानवः माप्रभा नवा नवीना यस्य स रामो मायया कृपया अधात् अन्तर्यामिरूपेण प्राविशत् । मायादंभे कृपायां चेति विश्वः । यद्वा मायया सीतया सह श्रुत्य-न्तरमपि तत्सृष्ट्वा तदेवानुप्राविशदिति अतएव ब्रह्मव्याप्यत्वात्तच्छरीरत्वाच्च विश्वमपि ब्रह्म ।

तथा च श्रुतिः-यः पृथिव्यां तिष्ठन् यं पृथिवी न वेद यस्य पृथिशरीरं यः प्रधानमन्तरे संचरन् यं प्रधानं न वेद यस्य प्रधानं शरीरं यो विज्ञानमन्तरे संचरन्। यं विज्ञानं न वेद यस्य विज्ञानं शरीरम्॥ भागवते च-खं वायुमग्नि सलिलं महीं च ज्योतींषि सर्वाणि दिशोऽदिशश्च। सरित्समुद्राश्च हरेः शरीरं यत्किं च भूतं प्रणमेदनन्यः। अतएव ब्रह्मैवेदममृतं पुरस्तात्पश्चाद्ब्रह्मदक्षिणतश्चोत्तरेण अधश्चोर्ध्वं प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्॥ अन्यापि सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीतेति। एतदुक्तं भवति। तस्माद्ब्रह्मणो जायते तस्मात्स्वस्वकारणे लीयते तस्मादनितिष्ठति इति तज्जलान् इदं सर्वं विश्वं ब्रह्मैव। आभ्यांस्थितानि तत्सत्तयैव विद्यमानानीत्यर्थः। आभ्यामेव प्रहृतानि तत्सत्तयैव स्वस्वकारणे लीनानीत्यर्थः। अत्र सच्चिदानन्दस्वरूपयोरनयोर्निमित्तत्वमेव नतूपादानत्वं प्रपंचस्यापि सच्चिदानन्दमयत्वापत्तेः॥ तथात्वे जडत्वात्पज्ञत्वादेरुच्छेदापत्तिः। इदमभिन्ननिमित्तोपादनकारणवादिनां बोधाय नानुमयिनामप्यनुकूलं शरीरस्यैव वास्तवोपादानस्वरूपे आरोपितोपादनस्यैव पर्यवसानात्। ननु सीतायाः प्रधानस्वरूपत्वादुपादानत्वमस्तीति चेन्न

तस्या अपि रामतापिन्यादौ चिद्रूपत्वेन प्रतिपाद-
नात् तथाहि-हेमाभया द्विभुजया सर्वालंकारया चिता
श्लिष्टः कमलधारिण्या पुष्टः कोशलजात्मजः ॥ चि-
ताचित्स्वरूपयेत्यर्थः । अतएव पाद्मे-कूटस्था जानकी
प्रोक्ता कूटस्थो रघुनन्दन इति ॥ अत्रैका शंका जा-
यते । अन्यत्र श्रुतिषु एकस्यैवेश्वरस्य जगत्कर्तृत्वादि
दृश्यते श्रूयते च अत्र सीतारामयोरुभयोस्तत्क-
थमिति । एवं न वक्तव्यम् । यत आकृतिमात्रे भेद-
स्वीकारस्तत्त्वत एकएव। अतएव श्रीमद्रामायणे। श्रियः
श्रीरित्युभयो विंशेषणम्। कौशल्यां प्रति सुमित्रा वाक्यम्।
सूर्यस्यापि भवेत्सूर्यो ह्यग्नेरग्निः प्रभोः प्रभुः । श्रियः
श्रीश्च भवेदग्र्या कीर्त्तेः कीर्तिः क्षमाक्षमा । अत्र
श्रियः श्रीरिति रामविशेषणम् ॥ युद्धकाण्डे वसुधाया
हि वसुधा श्रियाः श्रीर्भर्तृवत्सलेत्यत्र श्रियः श्रीमिति
जानकीविशेषणम् ॥ अतएव महाभारते, आनुशास-
निकपर्वाणि-न पद्मांका न चक्रांका न वज्रांका यतं
प्रजाः । लिंगांका च भगांका च तस्मान्मा-
हेश्वरी प्रजाः ॥ शिवो यास्यत्वान्महेश्वरो
रामः । सुन्दरीतंत्रे च-मम लिंगधरा नार्यः पुरुषा
रामलिंगकाः । उभयोरंशजाः सर्वे चावता-
राह्यसंख्यकाः ॥ ब्रह्मांडेऽपि-पुन्नामवाचकं यावत्

तत्सर्वं त्वं हि राघव। स्त्रीनामवाच्यकं यावत् तत्सर्वं जानकीशुभा ॥ तथाच वेदार्थसंग्रहे--श्रीमद्रामानुजाचार्योदाहृतविष्णुपुराणवाक्यानि । समस्ताःशक्तयश्चैता नृप यत्र प्रतिष्ठिताः। तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ॥ मूर्त्तं ब्रह्म महाभाग सर्वब्रह्ममयो हरिः । नित्यैवैषा जगन्माता विष्णोःश्रीरनपायिनी॥ यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम। देवत्वे देव देहेयं मानुषत्वे च मानुषी ॥ विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुम्। अत्र श्रीशब्दः पराशक्तिः परो विष्णुशब्दो महाविष्णुपरस्तयोः परस्वरूपेण प्रतिपादनात् ॥ पाद्मोपि-माता सा सर्वलोकानां पिता त्वं पुरुषर्षभ। नित्यं चैषा जगन्माता तव नित्यानपायिनी ॥ यथा सर्वगतस्त्वं हि तथा चेयं रघूत्तम। इत्यलमिति विस्तरेण प्रकृतमनुसरामः॥ यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशंति तद्विजिज्ञासस्वतद्ब्रह्मेति श्रुतिः। यत्प्रयन्ति यत्। यतः प्रयन्ति यत्सत्तया स्वस्वविषये प्रवर्तन्त इत्यर्थः ॥ यदभिसंविशंति यत् यतः अभिसंविशन्ति स्वस्वकारणे लीना भवन्तीत्यर्थः। अन्यापि द्यावाभूमिं जनयन् देव एक आस्ते विश्वस्यकर्त्ता भुवनस्य गोप्तेत्यादि । ननु ज्ञानविषयीभूतं मिथ्या, दृश्यत्वात्परिछिन्नत्वाच्च शुक्तिकारजतवत् ॥

यद्यद्दृश्यं जडं परिच्छिन्नं तत्तन्मिथ्याभूतं शुक्तिकायां रजतं दृश्यं जडं परिच्छिन्नं च तस्मान्मिथ्याभूतं तद्वत् सर्वं दृश्यादिपदार्थजातमित्यर्थ इति चेन्न । यद्येवं तर्हि ब्रह्मणोऽपि मिथ्यात्वं स्यात् ज्ञानविषयत्वात् । एवं न वक्तव्यं यतस्तज्ज्ञानाविषयम् । तथाच श्रुतिः—यतो वाचो निवर्तन्ते अप्राप्य मनसा सह यदि विशिष्टाभिप्रायेण ब्रह्मणो ज्ञानविषयत्वं तर्ह्यस्तु मिथ्यात्वं एवं मा वद यतः तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ब्रह्मवित् ब्रह्मैव भवति । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ॥ पश्चात्साक्षात्कारः कर्तव्यः । दृश्यते त्वग्र्यया बुद्ध्या इत्यादिश्रुतिः शुद्धब्रह्मपरा ॥ यतो वाचो निवर्तन्ते अप्राप्य मनसा सह इति श्रुतिस्तु यथा सुमेरोः सर्वेऽवयवा न दृश्यन्ते तथा ब्रह्मणोऽपि सर्वविशेषणानि मनो वचसामगोचराणीत्यभिप्रायवती । अन्यथा सत्यं ज्ञानमनन्तं ब्रह्म यः सर्वज्ञः सर्ववित् इत्यादि श्रुतीनां वैयर्थ्यापत्तिः स्यात् । नन्वस्तु वैयर्थ्यापत्तिरिति चेन्न । मोक्षस्यासंभवात् । यतो ब्रह्म ज्ञानं विना मोक्षो न भवति । श्रुतिरपि मायावादं खंडयति । यत्र हि द्वैतमिव भवति तर्हि इतर इतरं पश्यति ।

यत्र त्वस्य सर्वमात्मैवाभूत्तत्र केनकं पश्येत् केनकं विजानीयात् । अस्या अर्थः । यदि द्वैतमेव भवति तर्हि इतरो जीवप्रभृतिरितरमीश्वरप्रभृतिं पश्येत् । यत्र यदि त्वस्य जीवस्य सर्वं प्रपंचजातमीश्वरश्चात्मा-स्वरूपमेवाभूद्भवेत्तत्र तर्हि केनेन्द्रियेण कं पश्येदव-लोकयेत्केनकं दृश्यं विजानीयात् विशेषतो निश्चि-नुयात् । सर्वस्यैकत्वे दर्शनादि न संभवतीत्यर्थः ॥ तेन सर्वस्यैकत्वं नास्तीति ध्वनितम् । अन्यापि श्रुतिः आत्मातत्त्वमसि न तत् अतत् ब्रह्माभिन्न आत्मा त्व-मसि ॥ यद्वा तद्ब्रह्मसदृशस्त्वमसि नतु ब्रह्मेति भावः । अत्र तत् शब्दस्तत्सदृशे लक्षणया अतएव ब्रह्मविद्ब्रह्मैव भवति ॥ अत्र एव शब्द इवार्थे ब्रह्मस-दृशो भवतीत्यर्थः ॥ तथाच निरञ्जनं परममुपैति साम्यम् ॥ यद्वा तत् अव्ययं तेन तस्मात् तस्य एष्वर्थेषु विज्ञानेश्वरभिक्षुणोदाहृतसांख्यभाष्यस्थपद्मपुराण-वचनं चामायाइवादमसत्प्रोक्तं प्रच्छन्नं बौद्धमेव च । मयैव कथितं देवि कलौ ब्राह्मणरूपिणा ॥ वेदार्थ-वन्महाशास्त्रं मायावादमवैदिकम् । मयैव कथितं देवि जगतां नाशहेतवे ॥ परात्मजीवयोरैक्यं मायात्र प्रतिपाद्यते ॥ ननु अहं ब्रह्मास्मि अयमात्मा ब्रह्म सदा रामोऽहमित्येतत्तत्त्वतः प्रवदन्ति ये न ते संसा-

रिणो नूनं राम एव न संशय इत्यादिश्रुतिष्वभेद-
दर्शनान्न द्वैतमिति चेन्न ॥ तासां श्रुतीनामुपास-
नायां तात्पर्यं देवो भूत्वा देवं यजेतेत्यत्र स्पष्टम् ।
यद्वा राजपुत्रवत्तत्त्वोपदेशात् ॥ राजपुत्रस्य तत्त्वोप-
देशाद्विवेकोऽनुजायत इति अत्रेयमाख्यायिका ।
कश्चिद्राजपुत्रो गंडर्क्षजन्मा पुरान्निःसारितः। शवरेण
केनचित्पोषितोऽहं शवर इत्यभिमन्यमान आस्ते
तं जीवन्तं ज्ञात्वा कश्चिदमात्यः प्रबोधयति न त्वं
शवरोऽसीति किंतु राजपुत्रोऽसि स झटित्येव चांडाला-
भिमानं त्यक्त्वा तात्त्विकं राजभावमेवावलंबते राजा-
हमस्मीति एवमाप्तपुरुषकारुणिकोपदेशात् प्रकृत्य-
भिमानं त्यक्त्वा ब्रह्मशेषत्वात् तद्भृत्यत्वात्तत्सदृशसच्चि-
दानंदरूपत्वात्तद्व्याप्यत्वाच्च अहमपि ब्रह्मास्मि नतु
तद्विलक्षणः । एवं संसारी स्वस्वरूपं लभते इति ।
यद्वा सख्यादिभावप्राचुर्येण स्नेहाधिक्यात् स्वस्वरूपं
विस्मृत्य एवं वदति तत्स्वरूपं श्रुतिर्ज्ञापयति ॥ ननु द्वि-
तीयाद्वैभयं भवतीति श्रुतेर्न द्वितीयमिति चेन्न ॥ यतो
द्वितीयमात्रज्ञाने भयं भवत्यर्थस्तु न संभवति मित्रा-
दिज्ञाने भयादर्शनात् प्रमेयत्वमनुष्यत्वाभिधेयत्व
ब्राह्मणत्वादिज्ञानेऽपि भयादर्शनाच्च तस्मादयमर्थः ।
द्वितीयात्स्वान्तर्यामयपेक्षयान्यान्तर्यामिज्ञानाद्भयं भव-

ति। यद्वा द्वितीयात् श्रीरामादन्योऽपिकश्चिन्ममस्वामी रक्षक उपास्यः प्रयोजकश्चेत्यादिज्ञानाद्भयं भवति। अत्रार्थे स्मृतिरपि भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृतिः॥ तन्मायया- तो बुध आभजेत्तं भक्त्यैकयेशं गुरु देवतात्मा॥ ईशादपेतस्य ईशविमुखस्य तन्मायया अस्मृतिः। भगवतः स्वरूपास्फुर्तिस्ततो विपर्यो देहोस्मीति ततो द्वितीयस्य राजदेवतादिरक्षकांतरादेरभिनिवेशाद्भयं भवति॥ एकया अव्यभिचारिण्या भक्त्या भजेत्। गुरुदेवतात्मा गुरुरेव देवता ईश्वरः। आत्मा प्रेष्टश्च यस्य सः॥ ५॥ महाविष्णुर्महेशानः शिवो नारायणो हरिः। वासुदेवो महादेवस्तं रामं प्रणमाम्यहम्॥६॥ महाविष्णुरिति विष्ल्व्याप्तौ। वेवेष्टीति विष्णुः। विषेः किच्चेतिनुः-विशतेर्वा- नुक्प्रत्ययान्तस्य रूपं विष्णुरिति व्याप्तेर्मेरोदसी- पार्थ कान्तिश्चाभ्यधिकास्थिता। क्रमणाच्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञित॥ इति महाभारते॥ महांश्चासौ विष्णुश्च महाविष्णुः सर्वेषां विष्णवाद्यवतारा- णामवतारी इत्यर्थः॥ तथा च रामतापिन्याम्-विन्म- येऽस्मिन्महाविष्णौ जाते दशरथे हरौ। रघोः कुलेऽ- खिलं राति राजते यो महीस्थितः॥ श्रीमद्रा-

मायणेऽपि अयोध्याकांडे प्रथम सर्गे—सहि देवैरुदीर्णस्य रावणस्य वधार्थिभिः । अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः ॥ अत्र सनातन इति विशेषणेन महाविष्णुर्नतु महाविष्णोरसंभूतो विष्णुरिति भावः॥ अतएव रामतापिन्याम्-रावणवधार्थायावतारिणस्य रामस्यैव देवाः स्तुतिं चक्रुर्नत्वन्यस्य ॥ तथा हि स्तुतिं चक्रुश्च जगतः पतिं कल्पतरौ स्थितम्। कामरूपाय रामाय नमो मायामयाय च । नमो वेदादिरूपाय ॐकाराय नमोनमः॥रमाधराय रामाय श्रीरामायात्ममूर्त्तये।जानकीदेहभूषाय रक्षोघ्नाय शुभांगिने॥भद्राय रघुवीराय दशास्यान्तकरूपिणे।रामभद्रं महेष्वासो रघुवीर नृपोत्तम ॥ भोदशास्यान्तकास्माकं रक्ष देहि श्रियं च ते । त्वमैश्वर्यं दापयाथ संप्रत्याश्वरिमारणम् ॥ कुर्वंतिस्तुत्यदेवाद्यास्तेन सार्द्धं सुखंस्थिताः।मायामयाय मायया त्रिगुणात्मिकाया आमयाय रोगवद्विघातकाय ॥ यद्वा कृपाप्रचुराय ॥ अत्रैका शंका जायते।कस्मिंश्चिद्ग्रन्थे क्षीरसागरशायिनारायणात्कस्मिंश्चित् प्रद्युम्नव्यूहाद्राघवस्य प्रादुर्भावो दृश्यते तेषां वचनानां का गतिरित्थं न शंक्यम्। यतस्तेषां वचनानां कल्पांतरे तात्पर्य्यम् ॥ अन्यथा श्रुतिभिः सह विरोधात्तेषामप्रामाण्यापत्तिः स्यात् । अतएव नारदपंचरात्रान्तर्गतबृहद्ब्रह्मसंहितायां श्रीराम-

शरणागतिस्तोत्रे—वासुदेवादिमूर्त्तीनां चतुर्णां कारणं परम्। चतुर्विंशति मूर्त्तीनामाश्रयः शरणं मम॥ अत एव महेशानः सर्वस्य स्वामीत्यर्थः। (शिव इति शिवमस्यास्तीति शिवः—अर्शआद्यच् शिवयतीति वा तत्करोतीति ण्यन्तात्पचाद्यच्।) पद्मपुराणान्तर्गतरामाष्टोत्तरशतनामसु—परं ज्योतिः परं धाम पराकाशः परात्परः। परेशः पारगः पारः सर्ववेदात्मकःशिवः॥ सनत्कुमारसंहितायामपि—तापत्रयाग्निशमनं सर्वाघौघनिकृन्तनम्। दारिद्र्यदुःखशमनं सर्वसम्पत्करं शिवम्॥नारायण इति—नर आत्मा ततो जातान्याकाशादीनि नाराणि तानि कार्याण्ययते कारणात्मना व्याप्नोत्यतश्च तान्यस्यायनमिति नारायणः। यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इतिमंत्रवर्णात्॥ नराज्जातानि तत्त्वानि नाराणीति ततो विदुः। तान्येव चायनं तस्य तेन नारायणः स्मृत इति महाभारते॥ नराणां जीवानां अयनत्वात्प्रलय इति वा नारायणः॥ यत्प्रयन्त्यभिसंविशन्तीति श्रुतेः॥नराणामयनं यस्मात्तस्मान्नारायणः स्मृत इति ब्रह्मवैवर्त्ताद्वा नारायणः॥ अथ नारायणस्य सर्वकारणत्वमाह॥ तथाच नारायणोपनिषदि।

अथ पुरुषोहवै नारायणोऽकामयत प्रजाः सृजेय इति नारायणात्प्राणो जायते मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापश्च पृथिवी विश्वस्यधारिणी ॥ नारायणाद्ब्रह्माजायते नारायणाद्रुद्रो जायते नारायणात्प्रजापतिर्ज्जायते नारायणादिन्द्रो जायते नारायणादष्टौ वसवो नारायणादेकादशरुद्रा नारायणाद्द्वादशादित्याः सर्वे देवाः सर्वे ऋषयः सर्वाणि छन्दांसि सर्वाणि च भूतानि नारायणादेव समुत्पद्यन्ते । नारायणे प्रलीयन्ते। महोपनिषदि च-एको हवै नारायण आसीन्न ब्रह्मा नच शंकरः । नारायणं विना अन्यःकोऽपि त्राता न ॥ वायुपुराणे संसारार्णवमग्नानां नराणां पापकर्मणाम् । नान्यस्त्राता जगन्नाथं विना नारायणं विभुम् ॥ अथ नारायणाष्टाक्षरमाहात्म्यमाह । नारदपंचरात्रे-त्रयो वेदाः षडंगानि छंदांसि विविधाःसुराः। सर्वमष्टाक्षरान्तःस्थं यच्चान्यदपि वाङ्मयम् ॥ सर्ववेदान्तसारार्थः संसारार्णवतारणः । गतिरष्टाक्षरोनृणामपुनर्भवकांक्षिणाम् ॥ यत्राष्टाक्षरसंसिद्धो महाभागो महीयते। न तत्र संचरिष्यन्ति व्याधिदुर्भिक्षतस्कराः॥ देवदानवगंधर्वाः सिद्धविद्याधरादयः ॥ प्रणमन्ति महात्मानमष्टाक्षरविदं नरम् । व्यक्तं हि भगवानेव साक्षान्नारायणः स्वयम् ॥ अष्टाक्षरस्वरूपेण मुखेषु

परिवर्तते ॥ पाद्मोत्तरखण्डे—एवमष्टाक्षरो मंत्रो ज्ञेयः सर्वार्थसाधकः। सर्वदुःखहरः श्रीमान् सर्वमंत्रात्मकः शुभः॥ लिंगपुराणे—किमन्यैर्बहुभिर्मन्त्रैः किमन्यैर्बहुभिर्व्रतैः। नमो नारायणायेति मंत्रः सर्वार्थसाधकः॥ तस्मात्सर्वेषु कालेषु नमो नारायणेति यः। जपेत्स याति दिप्रेन्द्र विष्णुलोकं सबान्धवः॥ भविष्यपुराणे-अष्टाक्षरो महामंत्रः सर्वपापहरः परः। सर्वेषां विष्णुमन्त्राणां राजत्वे परिकीर्तितः॥ श्रीशुकव्याससंवादे च तत्रैव॥ नमो नारायणायेति मन्त्रः सर्वार्थसाधकः। भक्तानां जपतां तात स्वर्गमोक्षफलप्रदः॥ एष एव परो मोक्ष एष स्वर्ग उदाहृतः। सर्ववेदरहस्येभ्यः सार एष समुद्धृतः॥ विष्णुना वैष्णवानां तु हिताय मनुना पुरा। कीर्तितः सर्वपापघ्नः सर्वकामप्रदायकः॥ नारायणाय नम इत्ययमेव सत्यं संसारघोरविषसंहरणाय मन्त्रम्। शृण्वन्तु सत्यमतयो मुदितास्सरागा उच्चैस्तरामुपदिशाम्यहमूर्ध्वबाहुः॥ भूत्वोर्ध्वबाहुरद्याहं सत्यपूर्वं ब्रवीमि वः। हे पुत्रशिष्याः शृणुत न मंत्रोऽष्टाक्षरात्परः॥ अतएवोक्तं गारुडे-आसीनो वा शयानो वा तिष्ठानो यत्र तत्र वा। नमो नारायणायेति मंत्रैकशरणो भवेत्॥ अथ प्रसंगतः श्रीनारायणाष्टाक्षरमंत्रार्थमाह। तारसारोपनिषद् पूर्णमद इति शान्तिः। बृहस्पतिरुवाच याज्ञवल्क्यम्। यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां

ब्रह्मसदनं तस्माद्यत्र क्वच न गच्छेत् तदेवा-
मन्येत इदं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां
ब्रह्मसदनमविमुक्तं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां
भूतानां ब्रह्मसदनं अत्र हि जंतोः प्राणेषूत्क्रममाणेषु
रुद्रस्तारकं ब्रह्मव्याचष्टे । येनासावमृती भूत्वा मोक्षी
भवति तस्मात् अविमुक्तमेव निषेवेत अविमुक्तं न
विमुञ्चेदेवमेवैष भगवान्निति वै याज्ञयवल्क्यः।अथहैनं
भरद्वाजः पप्रच्छ याज्ञयवल्क्यं ।किं तारकं ।किं तारयतीति।
सहोवाच याज्ञयवल्क्यः।ओं नमो नारायणायेति तारकं
चिदात्मकमित्युपासितव्यम् ॥ ओमित्येकाक्षरं आत्म
स्वरूपं नम इति द्व्यक्षरम् प्रकृति स्वरूपं नारायणायेति
पंचाक्षरं परंब्रह्मस्वरूपमिति।य एवं वेद सोमृतो भवति।
ओमिति ब्रह्मा भवति नकारो विष्णुर्भवति मकारो
रुद्रो भवति नकारईश्वरो भवति रकारो अंडविराट्
भवति यकारः पुरुषो भवति णकारो भगवान् भवति
यकारः परमात्मा भवति एतद्वै नारायणस्याष्टाक्षर-
परमपुरुषो भवति अयं ऋग्वेदः। प्रथम ओमित्येतत्
अक्षरं परंब्रह्म तदेव उपासितव्यम्। एतदेव सूक्ष्माष्टा-
क्षरं भवति तदेव तदष्टात्मको अष्टधा भवति ॥
अकारः प्रथमाक्षरः।उकारो द्वितीयाक्षरो भवति मकार-
स्तृतीयाक्षरो भवति विन्दुस्तुर्याक्षरो भवति नादःपंच-

माक्षरो भवति कला षष्ठाक्षरो भवति कलातीतः सप्तमाक्षरो भवति परश्चाष्टमाक्षरो भवन्ति। तारकत्वात्तारको भवति तदेव तारकं ब्रह्मत्वं विद्धि तदेवोपासितव्यम् ॥ अत्रैते श्लोका भवन्ति। अकाराद्भवद्ब्रह्मा जांबवानिति संज्ञिकः। उकाराक्षरसंभूत उपेन्द्रो हरिनायकः।मकाराक्षरसंभूतः।शिवस्तु हनुमान् स्मृतः।।बिन्दुरीश्वरसंज्ञस्तु शत्रुघ्नः चक्रराट् स्वयम्।।नादो महाप्रभुर्ज्ञेयो भरतः शंखनामकः। कलायाः पुरुषः साक्षाल्लक्ष्मणो धरणीधरः।।कलातीता भगवती स्वयं सीतेति संज्ञिता।।तत्परः परमात्मा च श्रीरामः पुरुषोत्तमः ॥ ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भव्यं भविष्यति यच्चान्यत्तत्त्वमंत्रं वर्णादेवताछंदऋक्कलाशक्तिः सृष्ट्यात्मकमिति य एवं वेद यजुर्वेदो द्वितीयः ॥ अथ हैनं भरद्वाजो याज्ञवल्क्यमुवाच ॥ अथ कैर्मंत्रैः परमात्मा प्रीतो भवति स्वात्मानं दर्शयति तान्नो ब्रूहि भगवन्निति सहोवाच याज्ञवल्क्यः॥ ओं यो हवै श्रीपरमात्मा नारायणः स भगवानकारवाच्यो जांबवान् भूर्भुवस्तस्मै वै नमोनमः। यथा प्रथममंत्रोक्तौ आद्यन्तौ तथा सर्वमंत्रेषु द्रष्टव्यौ ॥ उकार वाच्य उपेन्द्रस्वरूपो हरिनायकः॥मकारवाच्यः शिवस्वरूपो

हनुमान् विन्दुस्वरूपः शत्रुघ्नः नादस्वरूपो भरतः कलास्वरूपो लक्ष्मणः कलातीता भगवती सीता चिच्छक्तिरूपा ॥ ओं यो हवै श्रीपरमात्मा नारायणः स भगवान् तत्परः परमपुरुषः पुराणपुरुष उत्तमो नित्य-शुद्धबुद्धमुक्तसत्परमानन्द अद्वयपरिपूर्णः परमात्मा-ब्रह्मैवाहं रामोऽस्मि भूर्भुवः स्वः तस्मै वै नमोनमः। एतत् अष्टविधं मंत्रं योऽधीते सोऽग्निपूतो भवति स वायुपूतो भवति आदित्यपूतो भवति स स्थाणुपूतो भवति सर्वैर्देवैर्ज्ञातो भवति तेनेतिहासपुराणानां रुद्राणां शतसहस्राणि जप्तानि भवन्ति श्रीमन्ना-रायणाष्टाक्षरस्मरणे न गायत्र्याः शतसहस्रं जप्तं भवति प्रणवानां अयुतं जप्तं भवति। दशपूर्वान् दशो-त्तरान् पुनाति नारायणपदमवाप्नोति य एवं वेद त-द्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततं तद्विप्रासो विपन्यवो जागृवांसः समि-न्धते विष्णोर्यत्परमं पदं इत्युपनिषत् सामवेदः तृतीयः ओं पूर्णमद इति शान्तिः तारसारोपनिषत्समाप्ता ॥ हरिरिति सर्वेषां जनानां मनो हरतीति हरिः। अचइ रि-त्यनेन इप्रत्ययः। तथा च श्रीमद्रामायणे—चन्द्रकान्ता-ननं राममतीवप्रियदर्शनम्। रूपौदार्यगुणैःपुंसां दृष्टि-चित्तापहारिणम् ॥ यद्वा पापं हरतीति हरिः। हरिर्हरति

पापानि दुष्टचित्तैरपि स्मृतः। अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः इति विष्णुपुराणे। हरिद्वर्णत्वाद्वा हरिः। हराम्यघं हि स्मर्तृणां हविर्भागं क्रतुष्वहम्। वर्णश्च मे हरिच्छ्रेष्ठस्तस्माद्धरिरहं स्मृतः इति व्यासस्मृतेः॥ वासुदेव इति सनत्कुमारसंहितान्तर्गत श्रीरामस्तवराजे। मत्स्यकूर्मवराहादिरूपधारिणमव्ययम्। वासुदेवं जगद्योनिमनादिनिधनं हरिम्॥ सर्वावतारनिधानभूतत्वात्स्वांशद्वारा जगज्जन्मादिहेतुत्वाच्च जगद्योनिः। तथा च नारदपंचरात्रान्तर्गतपाद्मसंहितायाम्। वृद्धब्रह्मसंहितायामपि। द्विहस्तमेकवक्त्रं च शुद्धस्फटिकसन्निभम्। सहस्रारविवह्नीन्दुलक्षकोटिसमप्रभम्॥ मरीचिचक्रमध्यस्थं चक्राद्यायुधलांछितम्। श्रीवत्सकौस्तुभोरस्कं वनमालाविराजितम्॥ किरीटहारकेयूरमंजीरपरिशोभितम्। पीताम्बरधरं सौम्यरूपमाद्यमनामयम्॥ स वासुदेवो विज्ञेयः सृज्यं सर्वं चतुर्मुखात्। ध्येयश्च योगिभिर्नित्यं हृत्पद्मान्तर्दृष्टरे॥ पश्यन्ति सूरयः पश्चात्तद्विष्णोः परमं पदम्। वासुदेवात्ततो जातो वासुदेवाह्वयः परः॥ एकवक्त्रश्चतुर्हस्तश्चक्राद्यायुधभूषितः। स्थित्यै चक्रं सरसिजं दधानः सृष्टये पुनः। मुक्तये पांचजन्यं च गदां संहृतये तथा॥ श्रीवत्सकौस्तुभोरस्को वनमालाविराजितः॥ ८॥ मयूरवर्णावच्छन्नः पीतनैसर्गिको वरः। स वासुदेवो भगवान् सृष्टिस्थि-

त्यन्तमुक्तिदः॥ आत्मानं स द्विधा चक्रे पुनः केनापि
हेतुना। तयोरेको वासुदेवः शुद्धस्फटिकसन्निभः॥
नारायणो द्वितीयोऽस्तु नीलाम्बुदसमप्रभः। संकर्षणो
वासुदेवात्तस्मात्प्रद्युम्नसंभवः ॥ प्रद्युम्नादनिरुद्धोऽ-
भूत् सर्व एते चतुर्भुजाः । ज्ञानादिगुणसामान्यो
वासुदेवः प्रकीर्तितः ॥ सत्त्वादिगुणसामान्यात्प्रकृतेः
प्रकृतिर्यथा। तथा गुणानां वैषम्ये वक्ष्यन्ते मूर्त्तयः
क्रमात् ॥ गुणत्रयस्य वैषम्ये यथा स्युर्महदादयः।
ज्ञानाधिको भवेद्ब्रह्म संकर्षणसमाह्वयः ॥ बलाधिकः
प्रद्युम्नः स्यादैश्वर्ये चानिरुद्धकः॥ मूर्त्तिभ्यश्च चतसृभ्यश्च-
तुर्विंशति मूर्त्तयः॥ जायन्ते क्रमशो ब्रह्मन् दीपादी-
पान्तरं यथा। सर्वे चतुर्भुजाः पद्मशंखचक्रगदाधराः॥
वासुदेवादिदेवाच्च प्रथमाः केशवस्तथा। नारायणो माध-
वश्च जज्ञिरे भूसुरोत्तम॥ संकर्षणाच्च गोविन्दो विष्णु-
श्च मधुसूदनः।त्रयस्ते समजायंत प्रद्युम्नाच्च त्रिविक्रमः
वामनः श्रीधरश्चेति जज्ञिरे मुनिसत्तम। अनिरुद्धात्
हृषीकेशः पद्मनाभश्च सुव्रत॥ दामोदरश्च तैरित्थं
द्वादशांशाः प्रजज्ञिरे। वासुदेवाच्च तन्नामा तथा सं-
कर्षणादपि॥ प्रद्युम्नादपि तन्नामा तन्नामैवानिरुद्ध-
कः।अभूवन्क्रमशस्तेभ्यश्चतुर्भ्यः पुरुषोत्तमः॥ अधोक्षजो
नृसिंहश्च चतुर्थश्चाच्युतोमतः। चतुर्भ्य एव तेभ्योऽभी
जज्ञिरे च यथाक्रमम्॥ जनार्दनस्तथोपेन्द्रो हरिः कृष्ण

समाख्यया। शुद्धस्फटिकसन्निभमिति॥ प्रत्यन्तस्वच्छ-
तया शुद्धस्फटिकसन्निभमित्युक्तम् न तु गौराभिप्रायेण।
अथ प्रसंगतो वासुदेवमंत्रमाहात्म्यमाह । पद्मपुराणे
देवदूतविकुण्डलसंवादे । सांगं समुद्रं सन्यासं सऋषिः
छंदंदैवतम्। सदीक्षाविधि सध्यानं समंत्रं द्वादशाक्षरम्॥
अष्टाक्षरं च मंत्रेशं ये जपन्ति नरोत्तमाः। तान् दृष्ट्वा
ब्रह्महा शुध्येत्ते यतो वैष्णवाःस्वयम्॥ शाखिनश्चाक्रिणो
भूत्वा ब्रह्मायुर्वनमालिनः। वसन्ति वैष्णवे लोके विष्णु-
रूपेण ते नराः॥ चतुर्थस्कन्धे ध्रुवं प्रति श्रीनारदोक्तो।
जप्यश्च परमो गुह्यः श्रूयतां मे नृपात्मज। यं
सप्तरात्रं प्रपठन् पुमान् पश्यति खेचरान् ॥ विष्णु-
पुराणे—गत्वा गत्वा निवर्तन्ते चन्द्रसूर्यादयोग्रहाः।
अद्यापि न निवर्त्तंते द्वादशाक्षरचिन्तकाः ॥ अथ वा-
सुदेवशब्दस्य निरुक्तिमाह । वसति वासयत्याच्छा-
दयति स्वयमिति वा वासुः दीव्यति क्रीडति विजि-
गीषते व्यवहरति द्योतते स्तूयते गच्छति वा देवः।
वासुश्चासौ देवश्चेति वासुदेवः। छादयामि जगत्सर्वं
भूत्वा सूर्यइवांशुभिः। सर्वभूताधिवासश्च वासुदे-
वस्ततः स्मृतः । वसनात्सर्वभूतानां वसुत्वाद्देवयो-
नितः ॥ वासुदेवस्ततो ज्ञेयो योगिभिस्तत्त्वदर्शिभि-
रित्युद्योगपर्वणि ॥ सर्वत्रासौ समस्तं च वसत्यत्रेति

वे यतः । ततः स वासुदेवेति विद्वद्भिः परिप-
ठ्यते॥ सर्वाणि तत्र भूतानि वसन्ति परमात्मनि ।
भूतेषु च स सर्वात्मा वासुदेवस्ततः स्मृत इति
विष्णुपुराणे ॥ यश्च वसुदेवस्यापत्यं वासुदेवेति
शब्दः सोऽवतारपरः। महादेव इति—आदिदेवो महा-
देवो देवेशो देवभृद्गुरुरिति । विष्णुसहस्रनामसु।
मह्यते पूज्यत इति महान्। महांश्चासौ देवश्चेति
महादेवः। वेदे रामायणे चैव पुराणे भारते तथा।
आदावन्ते तथा मध्ये हरिः सर्वत्र गीयत इति भा-
रतवचनात् ॥ महादेवरुद्रेन्द्राग्न्यादिशब्दरूपाणि
परब्रह्मपराणि ॥ ६ ॥ सूर्यमंडलमध्यस्थो द्विभुजो
रघुनंदनः। सर्वेश्वरः प्रसन्नात्मा तं रामं प्रणमाम्य-
हम्॥ सूर्यमंडलमध्यस्थ इति सनत्कुमारसंहिता-
याम्॥ सूर्यमंडलमध्यस्थं रामं सीतासमन्वितम्।
नमामि पुण्डरीकाक्षममेयं गुरुतत्परम् ॥ गुरौ त-
त्परः गुरुतत्परस्तं श्रीदशरथवसिष्ठादिगुरुवर्गे प्रसक्त-
मिति भावः। यद्वा गुरवः ब्रह्मादयः तत्पराः प्रसक्ता
यस्मिन्त्स तमन्यत्रापि ध्येयः। सदासवितृमण्डलम-
ध्यवर्त्तीनारायणस्सरसिजासनसन्निविष्टः। केयूरवान्
मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशंख-
चक्रः ॥ प्रतिस्वच्छतया हिरण्मयवपुः। युग्मायुध-

प्रतिपादनात् परस्वरूपप्रतिपादनाच्च न चतुर्भुजो द्विभुज इति । तथा च रामतापिन्याम् ॥ प्रकृत्या सहितः श्यामः पीतवासा जटाधरः । द्विभुजः कुण्डली रत्नमाली धीरो धनुर्द्धरः ॥ रुद्राध्यायपंचमाध्याये अन्योपि मन्त्रः ॥ नमस्ते रुद्रमन्यव उतोत इषवे नमः । बाहुभ्यामुतते नमः ॥१॥ महीधरभाष्यम् ॥ यथा नम इति रुत् दुःखं द्रावयतीति रुद्रः । यद्वा रु गतौ ये गत्यर्थास्ते ज्ञानार्थाः । रवणं रुत् ज्ञानंभावे क्विप् तुगागमः । रुत्ज्ञानं राति ददाति रुद्रः ज्ञानप्रदः । यद्वा पापिनो नरान् दुःखभोगेन रोदयतीति रुद्रः । हेरुद्र ते तव मन्यवे क्रोधाय नमो नमस्कारोऽस्तु । उतोऽपि च ते तव इषवे बाणाय नमः । उतापि च ते तव बाहुभ्यान्नमः । तवक्रोधबाणहस्ता अस्मदरिष्वेव प्रसरन्तु नास्मासु इत्यर्थः ॥ कृष्णयजुरापस्तंबशाखीयरुद्राध्याये ॥ नमस्ते रुद्र मन्यव उतोत इषवे नमः । नमस्ते अस्तु धन्वने बाहुभ्यामुतते नमः ॥ नच नीलकंठ पञ्चवक्र चतुर्भुज त्रिशूलधर रुद्रः । कुतो द्विभुजप्रतिपादनात् धनुर्बाणायुधाच्च ॥ पुरुषसूक्तावपि ॥ ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः–इति ॥ रघुनन्दन इति–रघुं रघुकुलं जीवं वा नन्दयतीति रघुनंदनः । सर्वेश्वर

इति—सर्वेषां ब्रह्मादीनामीश्वरः सर्वेश्वरः । यद्वा सर्वे ईश्वरा अवतारा यस्मात्स वासुदेवादिमूर्तीनामित्यस्मिन् श्लोके कारणत्वेनोक्तत्वात् ॥ अन्येषां विभूतिरूपत्वेन प्रतिपादनाच्च॥तथाहि श्रीमद्रामायणे॥ ततो हि दुर्मना रामः श्रुत्वैवं वदतां गिरः॥दध्यौ मुहूर्तं धर्मात्मा वाष्पव्याकुललोचनः ॥ १ ॥ ततो वैश्रवणो राजा यमश्च पितृभिः सह । सहस्राक्षश्च देवेशो वरुणश्च जलेश्वरः ॥ १ ॥ षडर्धनयनः श्रीमान्महादेवो वृषध्वजः । कर्ता सर्वस्य लोकस्य ब्रह्मा ब्रह्मविदांवरः ॥ ३ ॥ एते सर्वे समागम्य विमानैः सूर्यसन्निभैः । आगम्यनगरीलंकामभिजग्मुश्च राघवम् ॥ ४ ॥ ततः सहस्राभरणान्प्रगृह्य विपुलान्भुजान् । अब्रुवंस्त्रिदशश्रेष्ठा राघवं प्रांजलिं स्थितम् ॥५॥ कर्ता सर्वस्य लोकस्य श्रेष्ठो ज्ञानविदां विभुः—उपेक्षसे कथं सीतां पतन्तीं हव्यवाहने । कथं देवगणश्रेष्ठमात्मानं नावबुद्ध्यसे ॥ ६ ॥ अस्यार्थः। कर्ता सर्वस्य लोकस्य ब्रह्मा ब्रह्मविदांवरः । अत्र सर्वलोकस्य कर्तृत्वं ब्रह्मण उक्तम् । कर्त्ता सर्वस्य लोकस्य श्रेष्ठो ज्ञानविदांविभुः । अत्र सर्वलोकस्य कर्तृत्वं श्रीरामस्योक्तं उभयोः कर्तृत्वं कथं संघटते । एवं न वक्तव्यम्। यस्माद्ब्रह्मणः ब्रह्मलोकपर्यन्तं सर्वलोकवर्तिपदार्थानां कर्तृत्वम् । श्रीरामस्य तु ब्रह्मादीनामपि । तथा

च श्रुतिः—यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै-शरणमहं प्रपद्ये ॥ ६ ॥ ऋतधामावसुः पूर्वं वसूनां च प्रजापतिः । त्रयाणामपि लोकानामादिकर्ता स्वयं प्रभुः ॥ ७ ॥ स्वयं प्रभु इतराऽनियम्यः । नास्य कोऽपि नियन्तेति भावः ॥ ७ ॥ रुद्राणामष्टमो रुद्रः साध्यानामपि पंचमः । अश्विनौ चापि कर्णौ ते सूर्याचंद्रमसौ दृशौ ॥८॥ अंते चादौ च मध्ये च दृश्यते च परंतप । उपेक्षसे च वैदेहीं मानुषः प्राकृतो यथा ॥ ९ ॥ इत्युक्तो लोकपालैस्तैः स्वामी लोकस्य राघवः । अब्रवीत्त्रिदशश्रेष्ठान्रामो धर्मविदां-वरः ॥ १० ॥ आत्मानं मानुषं मन्ये रामं दशरथा-त्मजम् । सोहं यश्च यतश्चाहं भगवांस्तद्ब्रवीतु मे ॥ ११ ॥ इति ब्रुवाणं काकुत्स्थं ब्रह्मा ब्रह्मविदांवरः । अब्रवी-च्छृणु मे वाक्यं सत्यं सत्यपराक्रम ॥ ११ ॥ भवान्नारा-यणो देवः श्रीमांश्चक्रायुधः प्रभुः ॥ एकशृंगो वराह-स्त्वं भूतभव्यसपत्नजित् ॥ १२ ॥ अक्षरं ब्रह्म सत्यं च मध्ये चांते च राघव । लोकानां त्वं परोधर्मो विष्वक्सेनश्चतुर्भुजः ॥ १४ ॥ शार्ङ्गधन्वा हृषीकेशः पुरुषः पुरुषोत्तमः । अजितः खड्गधृग्विष्णुः कृष्ण-श्चैव बृहद्बलः ॥ १५ ॥ सेनानीर्ग्रामणीः सर्वं त्वं

बुद्धिस्त्वं क्षमा दमः । प्रभवश्चाप्ययश्चत्वमुपेंद्रो मधु-
सूदनः ॥ १६॥ इंद्रकर्मा महेन्द्रस्त्वं पद्मनाभोरणा-
न्तकृत्। शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः॥१७॥
सहस्रशृंगो वेदात्मा शतशीर्षो महर्षभः । त्वं त्रयाणां
हि लोकानामादिकर्ता स्वयं प्रभुः ॥ १८ ॥ सिद्धा-
नामपि साध्यानामाश्रयश्चासि पूर्वजः। त्वं यज्ञस्त्वं
वषट्कारस्त्वमोंकारः परात्परः ॥१९॥ प्रभवं निधनं
चापि नो विदुः को भवानिति। दृश्यते सर्वभूतेषु गोषु
च ब्राह्मणेषु च ॥ २० ॥ दिक्षु सर्वासु गगने पर्वतेषु
नदीषु च ॥ सहस्रचरणः श्रीमान् शतशीर्षः सहस्र-
दृक्॥२१॥त्वं धारयसि भूतानि पृथिवीं सर्वपर्वतान्।
अन्ते पृथिव्याः सलिले दृश्यते त्वं महोरगः
॥ २२ ॥ त्रीँल्लोकान् धारयन्नामदेवगंधर्वदान-
वान् ॥ अहं ते हृदयं राम जिह्वा देवी सरस्वती॥२३॥
देवा रोमाणि गात्रेषु ब्रह्मणा निर्मिताः प्रभो। निमेषस्ते
स्मृता रात्रि रुन्मेषो दिवसस्तथा ॥२४॥ संस्कारा-
स्त्वभवद्वेदा नैतदस्ति त्वया विना ॥ जगत्सर्वं शरीरं
ते स्थैर्यं ते वसुधातलम् ॥२५॥ अग्निः कोपः प्रसा-
दस्ते सोमः श्रीवत्सलक्षणः। त्वया लोकास्त्रयः क्रांताः
पुरा स्वैर्विक्रमैस्त्रिभिः ॥ २६॥ महेंद्रश्च कृतो राजा
बलिं बध्वा सुदारुणम्। सीता लक्ष्मीर्भवान्विष्णुर्देवः

कृष्णः प्रजापतिः ॥ २७ ॥ अत्र लक्ष्मीशब्देन पराशक्तिः विष्णुशब्देन राम एव । अन्यथा सूर्यस्यापि भवेत्सूर्यो ह्यग्नेरग्निः प्रभोः प्रभुः॥श्रियः श्रीश्च भवेदग्र्याकीर्तेः कीर्तिः क्षमाक्षमा ॥ श्रियाः श्रीर्भर्तृवत्सलामित्यादिभिः सह विरोधः स्यात् ॥ यद्वा विभूत्यभिप्रायेण वधार्थं रावणस्येह प्रविष्टो मानुषीं तनुम् । तदिदं नस्त्वया कार्यं कृतं धर्मभृतांवर॥२८॥ निहतो रावणो राम प्रहृष्टो दिवमाक्रम ॥ अमोघं देववीर्यन्ते न ते मोघाः पराक्रमाः ॥ २९ ॥ अमोघं दर्शनं राम अमोघस्तवसंस्तवः । अमोघास्ते भविष्यन्ति भक्तिमन्तो नरा भुवि ॥ ३० ॥ ये त्वां देवं ध्रुवं भक्ताः पुराणं पुरुषोत्तमम् । प्राप्नुवन्ति तथा कामानिहलोके परत्र च ॥ ३१ ॥ इममार्षस्तवं दिव्यमितिहासं पुरातनम् । ये नराः कीर्तयिष्यन्ति नास्ति तेषां पराभवः ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे आदि० युद्धकाण्डे एकोनविंशाधिकशततमः सर्गः ॥ ११९ ॥

पद्मपुराणे—श्रीरामं प्रति परशुरामवाक्यम् ।

राम राम महाबाहो न वेद्मि त्वां सनातनम् ॥
जानाम्यद्यैव काकुत्स्थ तववीर्यगुणादिभिः ।
त्वमादिपुरुषः साक्षात्परंब्रह्म परोऽव्ययः । त्वमन-

न्तो महाविष्णुर्वासुदेवः परात्परः। नारायणस्त्वमी-
शस्त्वमीश्वरस्त्वं त्रयीमयः॥ त्वं कालस्त्वं जगत्सर्व-
मकाराख्यस्त्वमेव च॥ स्रष्टा धाता च संहर्ता त्वमेव
परमेश्वर। त्वमचिन्त्यो महद्भूतरूपस्त्वं स्वगुणो
महान्। चतुःषट्पंचगुणवान् त्वमेव पुरुषोत्तमः॥
त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारस्त्रयीमयः। व्यक्ता-
व्यक्तस्वरूपस्त्वं गुणभृन्निर्गुणः परः॥ स्तोतुं त्वाहम-
शक्तश्च वेदानामप्यगोचरम्। यच्चापलत्वं कृतवांस्त्वा
युयुत्सुतया प्रभो॥ तत् क्षंतव्यं त्वया नाथ कृपया
केवलेन तु। तव शक्त्या नृपान्सर्वान् जित्वा दत्वा
महीं द्विजे। त्वत्प्रसादवशादेव शांतिमाप्नोति नैष्ठि-
कीम्॥ एवमुक्त्वा तु काकुत्स्थं जामदग्निर्महातपाः
परिणीय नमस्कृत्य राघवं लोकरक्षकम्॥ भारते परशु-
रामं प्रति श्रीरामवाक्यम्॥ पश्य मां स्वेन रूपेण चक्षुस्ते
वितराम्यहम्। ततो रामशरीरे वै रामःपश्यति भार्गवः॥
आदित्यान् स वसून् रुद्रान् साध्यांश्च स मरुद्गणान्॥
पितरो हुताशनश्च नक्षत्राणि ग्रहास्तथा। गंधर्वा
राक्षसा यज्ञा नद्यस्तीर्थानि यानि च॥ ऋषयो बाल-
खिल्याश्च ब्रह्मभूताः सनातनाः॥ देवर्षयश्च कार्त्स्नेन
समुद्राः पर्वतास्तथा। वेदाश्च सोपनिषदो वषट्कारैः
सहाध्वरैः॥ चेतोमन्ति च सामानि धनुर्वेदश्च भारत।

मेघवृन्दानि वर्षाणि विद्युतश्च युधिष्ठिर ॥
अत्रापि च सर्वैश्वरत्वं रुद्रादीनामपि तच्छरीरे दृष्टत्वात्।
प्रसन्न रमेति ॥ तथा च श्रीमद्रामायणे--हिमत् पूर्वा-
भिभाषी च धर्मं सर्वात्मनाश्रितः॥ राममिति तथा च
रामतापिन्याम् ॥ रमन्ते योगिनो यस्मिन् सत्यानन्दे
चिदात्मनि । इति राम पदेनासौ परंब्रह्माभिधीयते ॥
प्रसंगतः श्रीरामषडक्षरमंत्रमाहात्म्यमाह । हरिभक्ति-
विलासे श्रीगोपालभट्टोदाहृतमगस्त्यसंहितावाक्यानि।
सर्वेषु मंत्रवर्येषु श्रेष्ठं वैष्णवमुच्यते । गाणपत्येषु
शैवेषु शाक्तसौरेष्वभीष्टदम्॥ वैष्णवेष्वपि मंत्रेषु राम-
मंत्रः फलाधिकाः । गाणपत्यादिमंत्रेषु कोटि कोटि
गुणाधिकाः॥ विनैव दीक्षां विप्रेन्द्र पुरश्चर्यां विनैव-
हि । विनैव न्यासविधिना जपमात्रेण सिद्धिदाः ॥
मंत्रेष्वष्टत्वनायांशं फलदोऽयं षडक्षरः । षडक्षरोऽयं
मंत्रस्तु महाघौघनिवारणः ॥ मंत्रराज इति प्रोक्तः
सर्वेपामुत्तमोत्तमः । दैनं दिनन्तुदुरितं यद्यन्मासर्तुवर्ष-
जम् ॥ सर्वं दहति निःशेषं तूलाचलमिवानलः ।
ब्रह्महत्या सहस्राणि ज्ञानाज्ञानकृतानि च ॥ स्वर्ण-
स्तेयसुरापानगुरुतल्पायुतानि च । कोटि कोटि-
सहस्राणि ह्युपपापानि यान्यपि ॥ सर्वाण्यपि प्रण-
श्यन्ति राममंत्रानुकीर्तनात् ॥ तापिनीयश्रुतिषु च--

य एतत्तारकं ब्राह्मणो नित्यमधीते। स पाप्मानं तरति स मृत्युं तरति स भ्रूणहत्यां तरति ॥ स सर्वहत्यां तरति स संसारं तरति स सर्वं तरति स विमुक्ताश्रितो भवति सोऽमृतत्वं च गच्छतीति ॥७॥ तवास्मि जानकीनाथ तवास्मि रघुनन्दन । तवास्मि रघुशार्दूल रक्ष रक्ष कृपानिधे ॥ ८ ॥ लक्ष्मीनाथ समारम्भां पाराशर्यादिमध्यगाम्। अस्मदाचार्यपर्यन्तां वन्दे गुरुपरंपराम् ॥ ९ ॥ श्रीमद्रामसखेन्द्रस्य पादपद्मप्रसादतः । पूर्णः श्रीरामतत्त्वस्य भास्करो विदुषां मुदे ॥ १० ॥

इतिश्रीसीतारामकृपापात्र श्रीसीतारामीय हरिहरप्रसादविरचिते श्रीरामतत्त्वभास्करे उत्तरार्द्धं सम्पूर्णम् ।

रामं श्रीजानकीशं मनुकुलतिलकं, नागरीमोदयन्तम्।
राजन्यागर्वघातं, यजनसुनिरतं, नम्रशक्रादिदेवम्॥
दारोधारं जनेशं सकलगुणगणं नेत्रजायाः सुतीरे।
शोभाढ्यं वै रमन्तं धरणिपतिपतिं दीनबंधुं विवन्दे॥

इतिश्री-अयोध्याशृंगारभवननिवासिना श्रीमद्भगवन्नारायणवंशोद्भव वैष्णव पं॰ रामनारायणदासेन संशोधितं श्रीरामतत्त्वभास्करे उत्तरार्द्धं समाप्तम् ॥